जायन्ते तास्त्रिंशत्। तासान्तु वातपित्तकफशोणितरसान् द्वे द्वे वहतस्ता दश शब्दरूपरसगन्धानष्टाभिर्गृह्णीते। द्वाभ्यां भाषते च द्वाभ्यां घोषं करोति द्वाभ्यां स्वपिति द्वाभ्यां प्रतिबुध्यते द्वे चाश्रुवाहिन्यौ। द्वे स्तन्यं स्त्रिया वहतः स्तनसंश्रिते। ते एव शुक्रं नरस्य स्तनाभ्यामभिवहतः। तास्त्वेतास्त्रिंशत् सविभागा व्याख्याता एताभिरूर्द्ध्वं नाभेरुदरपार्श्वपृष्ठोरःस्कन्धग्रीवाबाहवो धार्य्यन्ते याप्यन्ते च।"

"अधोगमास्तु वातमूत्रपुरीषशुक्रार्त्तवादीन्यधो वहन्ति। तास्तु पित्ताशयमभिप्रतिपन्नास्तत्रस्थमेवान्नपानरसं विपक्वमौष्ण्याद्विवेचयन्त्योऽभिवहन्त्यः शरीरं तर्पयन्त्यर्पयन्ति चोर्द्ध्वगतानां तिर्य्यग्गतानां रसस्थानञ्चाभिपूरयन्ति मूत्रपुरीषस्वेदांश्च विरेचयन्त्यामपक्वाशयान्तरे च त्रिधा जायन्ते तास्त्रिंशत्। तासान्तु वातपित्तकफशोणितरसान् द्वे द्वे वहतस्ता दश द्वे अन्नवाहिन्यावन्त्राश्रिते तोयवहे द्वे मूत्रवस्तिमभिप्रपन्ने मूत्रवहे द्वे शुक्रवहे द्वे शुक्रप्रादुर्भावाय द्वे विसर्गाय ते एव रक्तमभिवहतो नारीणामार्त्तवसंज्ञम्। द्वे वर्च्चोनिरसन्यौ स्थूलान्त्रप्रतिबद्धे। अष्टावन्यास्तिर्य्यग्गामिनां धमनीनां स्वेदमर्पयन्ति। तास्त्वेतास्त्रिंशत् सविभागा व्याख्याता एताभिरधोनाभिः पक्वाशयकटीमूत्रपुरीषगुदवस्तिमेढ्रसक्थीनि धार्य्यन्ते याप्यन्ते च।"

"तिर्य्यग्गानान्तु चतसृणां धमनीनामेकैका शतधा सहस्रधा चोत्तरोत्तरं विभज्यन्ते तास्त्वसंख्येयास्ताभिरिदं शरीरं गवाक्षितं विबद्धमाततञ्च। तासां मुखानि रोमकूपप्रतिबद्धानि यैः स्वेदमभिवहन्ति रसञ्चापि सन्तर्पयन्त्यन्तर्बहिश्च तैरेव चाभ्यङ्गपरिषेकावगाहालेपनवीर्य्याण्यन्तः शरीरमभिप्रतिपद्यन्ते त्वचि विपक्वानि तैरेव स्पर्शं सुखमसुखं वा गृह्णाति। तास्त्वेताश्चतस्रो धमन्यः सर्व्वाङ्गगताः सविभागा व्याख्याताः।"

इति सुश्रुते शरीरस्थाने नवमेऽध्याये ॥०॥) हट्टविलासिनी। इत्यमरः॥ हरिद्रा। ग्रीवा। इति हेमचन्द्रः। ३। २८५॥ पृश्निपर्णी। इति राजनिर्घण्टः॥ नलिका। इति भावप्रकाशः॥

धम्मिल्लः, पुं, (धमतीति। धम + क्विप्। मिल्लतीति। मिल + कः। पृषोदरादित्वात् साधुः। ततः कर्म्मधारयः।) संयताः कचाः। इत्यमरः। २।६।९७॥ खोपा इति भाषा। कुसुमगर्भो मौक्तिकपद्मरागखचितादिना बहिःसंयतो बद्धः केशकलापः। इति भरतः॥ (यथा, गीतगोविन्दे। २। ११।
"साकूतस्मितमाकुलाकुलगलद्धम्मिल्लमुल्लासित-
भ्रूवल्लीकमलीकदर्शितभुजामूलार्द्धदृष्टस्तनम्॥")

धरः, पुं, (धरति पृथिवीमिति। धृ + अच्।) पर्व्वतः। (यथा, माघे। ४। १८।
"उत्कं धरं द्रष्टुमवेक्ष्य शौरिम्
उत्कन्धरं दारुक इत्युवाच।")
कार्पासतूलकः। कूर्म्मराजः। वसुभेदः। इति मेदिनी। रे, ४८॥ (यथा, हरिवंशे। ३। ३९।
"आपो ध्रुवश्च सोमश्च धरश्चैवानिलानलौ।
प्रत्यूषश्च प्रभासश्च वसवो नामभिः स्मृताः॥"
महादेवः। यथा, महाभारते।१३।१७।१०३।
"धाता शक्रश्च विष्णुश्च मित्रस्त्वष्टा ध्रुवो धरः।"
विष्णुः। श्रीकृष्णः। यथा, तत्रैव।६।६३।१३।
"सर्व्वलोकमयो नित्यः शास्ता धाता धरो ध्रुवः॥"
धारके, त्रि। यथा, काकपक्षधरः॥)

धरणं, क्ली, (धरतीति। धृ + ल्युः।) मानभेदः। स तु चतुर्विंशतिरक्तिकारूपः। इति लीलावती॥ पलदशमांशः। इति वैद्यकम्॥ ("अथ मध्यमनिष्पावा वा एकोनविंशतिर्धरणम्॥"
इति सुश्रुते चिकित्सितस्थाने ३१ अः॥
धृ + ल्युट्।) धारणम्। इति मेदिनी। णे, ५४॥ (यथा, कुमारे। १। १७।
"यज्ञाङ्गयोनित्वमवेक्ष्य यस्य
सारं धरित्रीधरणक्षमञ्च॥")

धरणः, पुं, (धृ + ल्युः।) अद्रिपतिः। लोकः। स्तनः। धान्यम्। दिवाकरः। इति हेमचन्द्रः॥ सेतुः। इति त्रिकाण्डशेषः॥ (वैद्यकमानविशेषः। यथा, पूर्व्वखण्डे प्रथमेऽध्याये शार्ङ्गधरेणोक्तम्।
"माषैश्चतुर्भिः शाणः स्याद्धरणः स निगद्यते॥")

धरणिः, स्त्री, (धरति जीवादीनिति। धृ + "अर्त्तिसृधृधमीति।" उणां २। १०२। इति अनिः।) पृथिवी। इत्यमरः। २। १। २॥ (यथा, महाभारते। १२। ३४२। ३।
"ज्योतिर्धरणिवाय्वरहिते अन्धे तमसि जलैकार्णवे लोके॥")

धरणिधरः, पुं, (धरतीति। धृ + अच्। धरण्याः धरः।) विष्णुः। इति हलायुधः॥ (कच्छपः। पर्व्वतः। शेषः। इति व्युत्पत्तिलब्धोऽर्थः॥)

धरणी, स्त्री, (धरणि + वा ङीष्।) पृथिवी। इति मेदिनी। णे, ५४॥ (यथा, विष्णुपुराणे। १। ९। १४१।
"यदा तु भार्गवो रामस्तदाभूद्धरणीत्वियम्॥")
शाल्मलिवृक्षः। इति शब्दचन्द्रिका॥ नाड़ी। कन्दविशेषः। तत्पर्य्यायः। धारणीया २ धीरपत्री ३ सकन्दकः ४ कन्दालुः ५ वनकन्दः ६ कन्दाढ्यः ७ दृढकन्दकः ८। अस्या गुणः। मधुरत्वम्। कफपित्तामयरक्तदोषकुष्ठकच्छूतिनाशित्वञ्च। इति राजनिर्घण्टः॥

धरणीकन्दः, पुं, (धरणी एव कन्दः।) धरणीनामकन्दविशेषः। इति राजनिर्घण्टः॥

धरणीकीलकः, पुं, (धरण्याः पृथिव्याः कीलक इव।) पर्व्वतः। इति शब्दरत्नावली॥

धरणीधरः, पुं, (धरण्या धरः।) विष्णुः। इति हेमचन्द्रः। २। १३१॥ (यथा, महाभारते। १३। १४९। ३८।
"अहः संवर्त्तको वह्निरनिलो धरणीधरः॥")
कच्छपः। इति राजनिर्घण्टः॥ पर्व्वतः। यथा, "यो जातो धरणीधरेन्द्रतनयागाथाद्विपायोरुहासक्तः।" इत्यादि गोपीनाथतर्काचार्य्यः॥ (पृथिवीधारके, त्रि। यथा, हरिवंशे। ५३। ६८।
"देवानचोदयद् ब्रह्मा निग्रहार्थं सुरद्विषाम्।
नरश्चैव पुराणर्षिं शेषञ्च धरणीधरम्॥")

धरणीपूरः, पुं, (धरणीं पूरयति प्लावयतीति। पूर + अण्।) समुद्रः। इति शब्दरत्नावली॥

धरणीप्लवः, पुं, (प्लु + भावे अप्। धरण्याः पृथिव्याः प्लवः प्लावो यस्मात्।) समुद्रः। इति त्रिकाण्डशेषः॥

धरणीश्वरः, पुं, (धरण्या ईश्वरः।) शिवः। इति शब्दरत्नावली॥

धरणीसुता, स्त्री, (धरण्याः सुता।) सीता। इति हेमचन्द्रः। ३। ३६७॥ (एतदुत्पत्तिकथा यथा, कालिकापुराणे ३७ अध्याये।
"नारदस्योपदेशेन यज्ञभूमिं ततो नृपः।
हलेन दारयामास यज्ञवाटावधि स्वयम्॥
तद्भूमिजातसीतायां शुभां कन्यां समुत्थिताम्।
लेभे राजा मुदा युक्तः सर्व्वलक्षणसंयुताम्॥
तस्यान्तु जातमात्रायां पृथिव्यन्तर्हिता स्वयम्।
जगाद वचनञ्चेदं गौतमं नारदं नृपम्॥
पृथिव्युवाच।
एषा सुता मया दत्ता तव राजन्! मनोहरा।
एनां गृहाण सुभगां कुलद्वयशुभावहाम्॥")

धरा, स्त्री, (धरति जीवसंघानिति। धृ + अच्। यद्वा, ध्रियते शेषेण इति। धृ + अप्। टाप्।) पृथिवी। इत्यमरः। २। १। २॥ (यथा, देवीभागवते। ३। १३। ८।
"धारणाच्च धरा प्रोक्ता पृथ्वी विस्तारयोगतः॥")
गर्भाशयः। मेदः। इति मेदिनी। रे, ४६॥ नाड़ी। इति राजनिर्घण्टः॥ महादानविशेषः। तद्यथा,—
"अथातः संप्रवक्ष्यामि धरादानमनुत्तमम्।
पापक्षयकरं नृणाममङ्गल्यविनाशनम्॥
कारयेत् पृथिवीं हैमीं जम्बुद्वीपानुकारिणीम्।
मर्य्यादापर्व्वतवतीं मध्ये मेरुसमन्विताम्॥
लोकपालाष्टकोपेतां नववर्षसमाचिताम्।
नदीनदशतोपेतां सप्तसागरवेष्टिताम्॥
महारत्नसमाकीर्णां वसुरुद्रार्कसंयुताम्।
हेम्नः पलसहस्रेण तदर्द्धेनाथ शक्तितः।
शतत्रयेण वा कुर्य्यात् द्विशतेन शतेन वा।
कुर्य्यात् पञ्चपलादूर्द्ध्वमशक्तोऽपि विचक्षणः॥
तुलापुरुषवत् कुर्य्याल्लोकेशावाहनं बुधः।
ऋत्विङ्मण्डपसम्भारभूषणाच्छादनादिकम्॥
वेद्यां कृष्णाजिनं कृत्वा तिलानुपरि विन्यसेत्।
तथाष्टादशधान्यानि रसांश्च लवणादयः॥
तथाष्टौ पूर्णकलशान् समन्तात् परिकल्पयेत्।
वितानकञ्च कौशेयं फलानि विविधानि च॥
तथांशुकानि रम्याणि श्रीखण्डशकलानि च।
इत्येवं रचयित्वा तामधिवासनपूर्व्वकम्॥
शुक्लमाल्याम्बरधरः शुक्लाभरणभूषितः।
प्रदक्षिणं ततः कृत्वा गृहीतकुसुमाञ्जलिः॥
पुण्यं कालमथासाद्य मन्त्रानेतानुदीरयेत्।
नमस्ते सर्व्वदेवानां त्वमेव भवनं यतः॥
धात्री च सर्व्वभूतानामतः पाहि वसुन्धरे!।